## तृतीयः पाठः

# ऋतुपरिचयः

**( विशेष्य-विशेषण-सम्बन्ध )**

[यद्यपि व्यवहार में शीतकाल, ग्रीष्मकाल तथा वर्षाकाल - ये तीन ही वर्ष में मुख्य ऋतुएँ हैं किंतु सूक्ष्म दृष्टि से विचार करने पर प्राचीन काल से भारत में छह ऋतुओं को मानने की परम्परा आ रही है। संसार में कहीं भी ये छह ऋतुएँ नहीं होतीं। भारत का प्राकृतिक सौन्दर्य इन छहों ऋतुओं का स्पष्ट भेद कर देता है। प्रस्तुत पाठ में इन ऋतुओं का संक्षिप्त परिचय दिया गया है।]



अस्माकं देशे षट् ऋतवः भवन्ति - वसन्तः, ग्रीष्मः, वर्षाः, शरद्, हेमन्तः, शिशिरं च। वसन्ते सर्वेषु पादपेषु नवानि किसलयानि पुष्पाणि च भवन्ति। सर्वत्र शोभनः समयः नातिशीतः नातितापः भवति। कोकिलानां मधुरः स्वरः राजते। ग्रीष्मे सूर्यस्य तापः प्रखरः भवति। जलाशयाः प्रायेण जलशून्याः भवन्ति। सर्वे जीवाः छायाम् इच्छन्ति। विद्यालयेषु ग्रीष्मे अवकाशः भवति।

वर्षाकाले आकाशः मेघयुक्तः भवति। यदा-कदा वृष्टिरपि भवति। सम्पूर्णा पृथ्वी जलेन तृप्यति। कृषिः सर्वत्र शोभते। यदा अतिवृष्टिः भवति तदा नदीषु जलप्लावनं जायते। जनाः कष्टम् अनुभवन्ति। मार्गाः अपि विच्छिन्नाः भवन्ति। शरत्काले पुनः शोभनः समयः आगच्छति। नदीषु जलाशयेषु च जलं स्वच्छं भवति। अस्मिन् समये एव दुर्गापूजा, दीपावली च प्रसिद्धौ उत्सवौ भवतः।

हेमन्ते शीतस्य आरम्भः भवति । सूर्यस्य किरणाः रोचन्ते । धान्यं क्षेत्रेषु पक्वं भवति । कृषकाः तेन प्रसन्नाः भवन्ति । शिशिरे शीतस्य आधिक्यं भवति । सूर्यस्य किरणाः अपि यदा-कदा तुषारैः लुप्ताः भवन्ति । निर्धनाः जनाः शीतेन पीडाम् अनुभवन्ति । यत्र-तत्र अग्निः प्रज्वालितः सेवितश्च भवति । सर्वेषु ऋतुषु वसन्तः राजा कथ्यते ।

ग्रीष्मो वर्षाः शरच्चैव हेमन्तो शिशिरं तथा ।
तेषु सर्वेषु राजायं वसन्तो मोददायकः ॥

## शब्दार्थः

| | | |
|---|---|---|
| अस्माकम् | = | हमलोगों का / हमारा, हमारे |
| देशे | = | देश में |
| सर्वेषु | = | सब में |
| पादपेषु | = | पौधों / वृक्षों में |
| नवानि किसलयानि | = | नये पत्ते |
| पुष्पाणि | = | फूल (बहुवचन) |
| सर्वत्र | = | सभी जगह |
| नातिशीतः | = | न अधिक ठंढ |
| नातितापः | = | न अधिक गर्मी |
| कोकिलानाम् | = | कोयलों का |
| राजते | = | शोभता है |
| सूर्यस्य | = | सूर्य का |

| | | |
|---|---|---|
| खरः | = | तेज |
| लाशयाः | = | जलाशय / तालाब |
| ायेण | = | प्रायः / बहुधा / लगभग |
| लशून्याः | = | जलरहित |
| ीवाः | = | जीव (बहुवचन) |
| ायाम् | = | छाया (को) |
| द्यालयेषु | = | विद्यालयों में |
| र्षाकाले | = | वर्षा के समय (में) |
| दा-कदा | = | कभी-कभी |
| प्यति | = | तृप्त होता है / संतुष्ट होता है |
| तिवृष्टिः | = | अधिक वर्षा |
| दा | = | तब |
| दीषु | = | नदियों में |
| लप्लावनम् | = | बाढ़ |
| ायते | = | हो जाता है |
| नुभवन्ति | = | अनुभव करते हैं |
| च्छिन्नाः | = | टूट जाते हैं |
| रत्काले | = | शरद् ऋतु में |
| स्मिन् | = | इसमें |

| | | |
|---|---|---|
| रोचन्ते | = | अच्छे लगते हैं। (बहुवचन) |
| धान्यम् | = | धान / अन्न |
| क्षेत्रेषु | = | खेतों में |
| पक्वम् | = | पका हुआ |
| कृषकाः | = | किसान (बहुवचन) |
| तेन | = | उससे |
| आधिक्यम् | = | अधिकता |
| तुषारैः | = | ओस के कणों से (बहुवचन) |
| पीडाम् | = | कष्ट (को) |
| सेवितः | = | सेवन किया गया |
| कथ्यते | = | कहा जाता है (कर्मवाच्य) |
| मोददायकः | = | आनन्द देने वाला |

## व्याकरणम्

संस्कृत में विशेष्य और विशेषण एक ही रूप के होते हैं। जो विभक्ति, लिङ्ग तथा वचन विशेष्य में होते हैं वे ही विशेषण में लगाये जाते हैं। इस पाठ में इन अभिव्यक्तियों को देखें-

| | |
|---|---|
| सर्वेषु पादपेषु | सम्पूर्णा पृथ्वी |
| नवानि किसलयानि | मार्गाः विच्छिन्नाः |
| शोभनः समयः | जलं स्वच्छम् |
| मधुरः स्वरः | प्रसिद्धौ उत्सवौ |

प्रखरः तापः — धान्यं पक्वम्

जलशून्याः जलाशयाः — किरणाः लुप्ताः

मेघयुक्तः आकाशः — निर्धनाः जनाः

वसन्तः मोददायकः

## सन्धि-विच्छेदः

नाति = न + अति (दीर्घसन्धिः, स्वरसन्धिः)

वृष्टिरपि = वृष्टिः + अपि (विसर्गसन्धिः)

सेवितश्च = सेवितः + च (विसर्गसन्धिः)

शरच्चैव = शरत् + च + एव (व्यञ्जनसन्धिः, वृद्धिसन्धिः)

## प्रकृति-प्रत्यय-विभागः

गच्छन्ति = √गम् , लट्लकारः, प्रथमपुरुषः, बहुवचनम्

तृप्यति = √तृप् , लट्लकारः, प्रथमपुरुषः, एकवचनम्

अनुभवन्ति = अनु + √भू , लट्लकारः, प्रथमपुरुषः, बहुवचनम्

रोचन्ते = √रुच् , लट्लकारः, प्रथमपुरुषः, बहुवचनम्

जायते = √जन् , लट्लकारः, प्रथमपुरुषः, एकवचनम्

शोभते = √शुभ् , लट्लकारः, प्रथमपुरुषः, एकवचनम्

आगच्छति = आ + √गम् , लट्लकारः, प्रथमपुरुषः, एकवचनम्

कथ्यते = √कथ् + यक् (कर्मवाच्यम्), लट्लकारः, प्रथमपुरुषः, एकवचनम्

विच्छिन्नाः = वि + √छिद् + क्त, प्रथमपुरुषः, बहुवचनम्

# अभ्यासः

## मौखिकः

1. **अधोलिखितानां पदानाम् उच्चारणं कुरुत -**

अस्माकम्, इच्छन्ति, वृष्टिरपि, तृप्यति, जलप्लावनम्, शरत्काले, तुषारै प्रज्वालितः, सेवितश्च, ऋतुषु ।

2. **अधोलिखितानां पदानाम् अर्थं वदत -**

किसलयानि, पादपः, प्रायेण, विच्छिन्नाः, सर्वत्र, यदा-कदा, पक्वम्, तुषारैः, रोचन्ते ।

3. **निम्नलिखितानां पदानां बहुवचनं वदत -**

इच्छति, पठसि, गच्छामि, भवति, तृप्यति, आगच्छति, बालकः, फलम्

## लिखितः

4. **कोष्ठात् शब्दं चित्वा रिक्तस्थानानि पूरयत -**

(क) अस्माकं देशे ………………………… ऋतवः भवन्ति । (पञ्च / षड्)

(ख) शिशिरे ………………………… आधिक्यं भवति । (तापस्य / शीतस्य)

(ग) सर्वेषु ऋतुषु राजा ………………………… भवति । (वसन्तः / ग्रीष्मः)

(घ) ………………………… स्वरः मधुरः भवति । (कोकिलस्य / काकस्य)

(ङ) हेमन्ते ………………………… आरम्भः भवति । (शीतस्य / तापस्य)

5. **सुमेलनं कुरुत -**

| 'अ' | 'आ' |
|---|---|
| (क) कोकिलः | (i) जलप्लावनम् |
| (ख) वर्षाः | (ii) वसन्तः |
| (ग) ऋतुराजः | (iii) मधुरः स्वरः |
| (घ) षट् | (iv) प्रज्वालितः |
| (ङ) अग्निः | (v) ऋतवः |

6. निम्नलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत -

(क) अस्माकं देशे कति ऋतवः भवन्ति ?

(ख) कदा सूर्यस्य तापः प्रखरः भवति ?

(ग) विद्यालयेषु अवकाशः कदा भवति ?

(घ) सम्पूर्णा पृथ्वी केन तृप्यति ?

(ङ) शीतस्य आरम्भः कदा भवति ?

7. उदाहरणानुसारं लिखत -

| | |
|---|---|
| यथा - एकवचनम् | बहुवचनम् |
| भवति | भवन्ति |
| (क) आगच्छति | ........................ |
| (ख) इच्छति | ........................ |
| (ग) तृप्यति | ........................ |
| (घ) वदसि | ........................ |
| (ङ) ददामि | ........................ |
| (च) करोषि | ........................ |
| (छ) गच्छामि | ........................ |
| (ज) कथ्यते | ........................ |

8. लिखत 'आम्' (हाँ) अथवा 'न' (नहीं)। उत्तरम्

यथा - अस्माकं देशे षट् ऋतवः भवन्ति - आम्।

(क) विद्यालयेषु हेमन्ते अवकाशः भवति - ........................

(ख) वसन्ते शीतस्य आरम्भः भवति - ........................

(ग) शिशिरे शीतस्य आरम्भः भवति - ..............................

(घ) ग्रीष्मे जलाशयाः प्रायेण जलपूर्णाः **भवन्ति** - ..............................

(ङ) **निर्धनाः जनाः शीतेन** पीडाम् अनुभवन्ति - ..............................

**9. उदाहरणानुसारेण मध्यमपुरुषरूपाणि लिखत -**

यथा - पठति - पठसि ।

(क) गच्छति - .............................. ।

(ख) पठिष्यति - .............................. ।

(ग) कथयति - .............................. ।

(घ) गच्छतः - .............................. ।

(ङ) पठन्ति - .............................. ।

**10. उदाहरणानुसारेण विभक्तिनिर्णयं कुरुत -**

यथा - बालकेन - तृतीया विभक्तिः

(क) बालकाय - .............................. ।

(ख) नदीनाम् - .............................. ।

(ग) गृहेषु - .............................. ।

(घ) वृक्षैः - .............................. ।

(ङ) लतया - .............................. ।

**11. उदाहरणानुसारेण वचननिर्णयं कुरुत -**

यथा - नद्यौ - द्विवचनम् ।

(क) लताः - ..............................

(ख) लताभिः - ..............................

(ग) बालकेषु - ..............................

(घ) भवनात् - ..............................

(ङ) पुरुषः - ..............................

## योग्यता-विस्तार:

एक वर्ष में छह ऋतुएँ होती हैं । एक-एक ऋतु में दो मास माने जाते हैं । वसन्त ऋतु चैत्र और वैशाख मासों में होती है । इसका स्वागत चैत्र के प्रथम दिवस को वसन्तोत्सव मनाकर किया जाता है । ज्येष्ठ और आषाढ़ मास को ग्रीष्म कहते हैं । सूर्य का ताप इन मासों में बहुत अधिक रहता है । श्रावण तथा भाद्रपद (भादो) मासों को वर्षा ऋतु कहते हैं । इनमें खूब वृष्टि होती है । आश्विन और कार्तिक मास शरद् ऋतु के होते हैं । धान के पौधे इन मासों में फल से भर जाते हैं और पकने लगते हैं । अग्रहायण (अगहन, मार्गशीर्ष) तथा पौष मास हेमन्त ऋतु के हैं । इसमें शीत का प्रकोप बढ़ने लगता है । माघ और फाल्गुन को शिशिर ऋतु कहते हैं । इनमें ओस, कुहासा आदि की वृद्धि रहती है । इस प्रकार ऋतुओं का चक्र चलता है ।

संस्कृत के कवियों ने काव्यों में सभी ऋतुओं का वर्णन किया है । कालिदास का ऋतुसंहार काव्य ग्रीष्म से आरम्भ करके वसन्त तक का वर्णन देता है । इसमें छह सर्ग (खण्ड) हैं । कुल श्लोकों की संख्या 144 है ।

*****